# ॥ वाल्मीकि रामायण॥

## ६ युद्धकाण्ड

### अध्याय ४१

तेषां सुतुमुलं शब्दं वानराणां तरस्विनाम् ।
नर्दतां राक्षसैः सार्धं तदा शुश्राव रावणः ॥ १॥

स्निग्धगम्भीरनिर्घोषं श्रुत्वा स निनदं भृशम् ।
सचिवानां ततस्तेषां मध्ये वचनमब्रवीत् ॥ २॥

यथासौ सम्प्रहृष्टानां वानराणां समुत्थितः ।
बहूनां सुमहान्नादो मेघानामिव गर्जताम् ॥ ३॥

व्यक्तं सुमहती प्रीतिरेतेषां नात्र संशयः ।
तथा हि विपुलैर्नादैश्चुक्षुभे वरुणालयः ॥ ४॥

तौ तु बद्धौ शरैस्तीक्ष्णैर्भ्रातरौ रामलक्ष्मणौ ।
अयं च सुमहान्नादः शङ्कां जनयतीव मे ॥ ५॥

एतत्तु वचनं चोक्त्वा मन्त्रिणो राक्षसेश्वरः ।
उवाच नैरृतांस्तत्र समीपपरिवर्तिनः ॥ ६॥

ज्ञायतां तूर्णमेतषां सर्वेषां वनचारिणाम् ।
शोककाले समुत्पन्ने हर्षकारणमुत्थितम् ॥ ७॥

तथोक्तास्तेन सम्भ्रान्ताः प्राकारमधिरुह्य ते ।
ददृशुः पालितां सेनां सुग्रीवेण महात्मना ॥ ८॥

तौ च मुक्तौ सुघोरेण शरबन्धेन राघवौ ।
समुत्थितौ महाभागौ विषेदुः प्रेक्ष्य राक्षसाः ॥ ९॥

सन्त्रस्तहृदया सर्वे प्राकारादवरुह्य ते ।
विषण्णवदनाः सर्वे राक्षसेन्द्रमुपस्थिताः ॥ १०॥

तदप्रियं दीनमुखा रावणस्य निशाचराः ।
कृत्स्नं निवेदयामासुर्यथावद्वाक्यकोविदाः ॥ ११॥

यौताविन्द्रजिता युद्धे भ्रातरौ रामलक्ष्मणौ ।
निबद्धौ शरबन्धेन निष्प्रकम्पभुजौ कृतौ ॥ १२॥

विमुक्तौ शरबन्धेन तौ दृश्येते रणाजिरे ।
पाशानिव गजाउ चित्त्वा गजेन्द्रसमविक्रमौ ॥ १३॥

तच्छ्रुत्वा वचनं तेषां राक्षसेन्द्रो महाबलः ।
चिन्ताशोकसमाक्रान्तो विषण्णवदनोऽब्रवीत् ॥ १४॥

घोरैर्दत्तवरैर्बद्धौ शरैराशीविषोमपैः ।
अमोघैः सूर्यसङ्काशैः प्रमथ्येन्द्रजिता युधि ॥ १५॥

तमस्त्रबन्धमासाद्य यदि मुक्तौ रिपू मम ।
संशयस्थमिदं सर्वमनुपश्याम्यहं बलम् ॥ १६॥

निष्फलाः खलु संवृत्ताः शरा वासुकितेजसः ।
आदत्तं यैस्तु सङ्ग्रामे रिपूणां मम जीवितम् ॥ १७॥

एवमुक्त्वा तु सङ्क्रुद्धो निश्वसन्नुरगो यथा ।
अब्रवीद्रक्षसां मध्ये धूम्राक्षं नाम राकसं ॥ १८॥

बलेन महता युक्तो रक्षसां भीमकर्मणाम् ।
त्वं वधायाभिनिर्याहि रामस्य सह वानरैः ॥ १९॥

एवमुक्तस्तु धूम्राक्षो राक्षसेन्द्रेण धीमता ।
कृत्वा प्रणामं संहृष्टो निर्जगाम नृपालयात् ॥ २०॥

अभिनिष्क्रम्य तद्द्वारं बलाध्यक्षमुवाच ह ।
त्वरयस्व बलं तूर्णं किं चिरेण युयुत्सतः ॥ २१॥

धूम्राक्षस्य वचः श्रुत्वा बलाध्यक्षो बलानुगः ।
बलमुद्योजयामास रावणस्याज्ञया द्रुतम् ॥ २२॥

ते बद्धघण्टा बलिनो घोररूपा निशाचराः ।
विनर्दमानाः संहृष्टा धूम्राक्षं पर्यवारयन् ॥ २३॥

विविधायुधहस्ताश्च शूलमुद्गरपाणयः ।
गदाभिः पट्टसैर्दण्डैरायसैर्मुसलैर्भृशम् ॥ २४॥

परिघैर्भिण्डिपालैश्च भल्लैः प्रासैः परश्वधैः ।
निर्ययू राक्षसा घोरा नर्दन्तो जलदा यथा ॥ २५॥

रथैः कवचिनस्त्वन्ये ध्वजैश्च समलङ्कृतैः ।

सुवर्णजालविहितैः खरैश्च विविधाननैः ॥ २६॥

हयैः परमशीघ्रैश्च गजेन्द्रैश्च मदोत्कटैः ।
निर्ययू राक्षसव्याघ्रा व्याघ्रा इव दुरासदाः ॥ २७॥

वृकसिंहमुखैर्युक्तं खरैः कनकभूषणैः ।
आरुरोह रथं दिव्यं धूम्राक्षः खरनिस्वनः ॥ २८॥

स निर्यातो महावीर्यो धूम्राक्षो राक्षसैर्वृतः ।
प्रहसन्पश्चिमद्वारं हनूमान्यत्र यूथपः ॥ २९॥

प्रयान्तं तु महाघोरं राक्षसं भीमदर्शनम् ।
अन्तरिक्षगताः क्रूराः शकुनाः प्रत्यवारयन् ॥ ३०॥

रथशीर्षे महाभीमो गृध्रश्च निपपात ह ।
ध्वजाग्रे ग्रथितास्चैव निपेतुः कुणपाशनाः ॥ ३१॥

रुधिरार्द्रो महाञ्श्वेतः कबन्धः पतितो भुवि ।
विस्वरं चोत्सृजन्नादं धूम्राक्षस्य समीपतः ॥ ३२॥

ववर्ष रुधिरं देवः सञ्चचाल च मेदिनी ।
प्रतिलोमं ववौ वायुर्निर्घातसमनिस्वनः ।
तिमिरौघावृतास्तत्र दिशश्च न चकाशिरे ॥ ३३॥

स तूत्पातांस्ततो दृष्ट्वा राक्षसानां भयावहान् ।
प्रादुर्भूतान्सुघोरांश्च धूम्राक्षो व्यथितोऽभवत् ॥ ३४॥

ततः सुभीमो बहुभिर्निशाचरैर्
वृतोऽभिनिष्क्रम्य रणोत्सुको बली ।
ददर्श तां राघवबाहुपालितां
समुद्रकल्पां बहुवानरीं चमूम् ॥ ३५॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com